# श्री दक्षिणामूर्तिस्तोत्रम्

śrī dakṣiṇāmūrtistotram

## ध्यानम्

dhyānam

मौनव्याख्याप्रकटित-परब्रह्मतत्त्वं युवानं वर्षिष्ठान्ते वसदृषिगणैरावृतं ब्रह्मनिष्ठैः।

आचार्येन्द्रं करकलित चिन्मुद्रमानन्दरूपं स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीढे॥ १

maunavyākhyāprakaṭita-parabrahmatattvaṁ yuvānaṁ
varṣiṣṭhānte vasadṛṣigaṇairāvṛtaṁ brahmaniṣṭhaiḥ ।
ācāryendraṁ karakalita cinmudramānandarūpaṁ
svātmārāmaṁ mudita-vadanaṁ dakṣiṇāmūrtimīḍhe ।। 1

वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् ।

त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि॥ २

vaṭaviṭapisamīpe bhūmi-bhāge niṣaṇṇaṁ
sakala-muni-janānāṁ jñāna-dātāramārāt ।
tribhuvana-gurumīśaṁ dakṣiṇāmūrtidevaṁ
janana-maraṇa-duḥkhaccheda-dakṣaṁ namāmi ।। 2

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा।

गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः॥ ३

citraṁ vaṭatarormūle vṛddhāḥśiṣyā gururyuvā ।
gurostu maunaṁ vyākhyānaṁ śiṣyāstu chinnasaṁśayāḥ ।। 3

निधये सर्वविद्यानां भिषजे भवरोगिणाम्

गुरवे सर्वलोकानां दक्षिणामूर्तये नमः॥ ४

nidhaye sarvavidyānāṁ bhiṣaje bhava-rogiṇām
gurave sarva-lokānāṁ dakṣiṇāmūrtaye namaḥ ।। 4

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये।

निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः॥ ५

om namaḥ praṇavārthāya śuddha-jñānaikamūrtaye ।
nirmalāya praśāntāya dakṣiṇāmūrtaye namaḥ ।। 5

चिद्घनाय महेशाय वटमूलनिवासिने।

सच्चिदानन्दरूपाय दक्षिणामूर्तये नमः॥ ६

cidghanāya maheśāya vaṭamūla-nivāsine ।
saccidānanda-rūpāya dakṣiṇāmūrtaye namaḥ ।। 6

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने।

व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः॥ ७

īśvaro gururātmeti mūrtibhedavibhāgine ।
vyomavad-vyāpta-dehāya dakṣiṇāmūrtaye namaḥ ।। 7